# १८ अष्टादश दशकः - राम कथा

सूर्यान्वये दाशरथी रमेशो रामाभिधोऽभूद्भरतोऽथ जातः ।
ज्येष्टानुवर्त्ती खलु लक्ष्मणश्च शत्रुघ्न नामाऽपि जगद्विधात्रि ॥ १८-१॥

विमातृ वाक्योज्झित राज्यभोगो रामः ससीतः सह लक्ष्मणश्च ।
चरन् जटावल्कलवा नरण्ये गोदावरीतीर मवाप देवि ॥ १८-२॥

तं वञ्चयन् रावण एत्य मायी जहार सीतां यतिरूपधारी ।
रामस्य पत्नी विरहातु रस्य श्रुत्वा विलापं वनमप्यरोदीत् ॥ १८-३॥

श्रीनारदोऽभ्येत्य जगाद रामं किं रोदिषि प्राकृतमर्त्यतुल्यः ।
त्वं रावणं हन्तु मिहावतीर्णो हरिः कथं विस्मर सीदमार्य ॥ १८-४॥

कृते युगे वेदवतीति कन्या हरिं श्रुतिज्ञा पतिमाप्तु मैच्छत् ।
सा पुष्कर द्वीप गता तदर्थं एकाकिनी तीव्र तपश्चकार ॥ १८-५॥

श्रुता तयाऽभू दशरीरि वाक् ते हरिः पतिर्भाविनि जन्मनि स्यात् ।
निशम्य तद्धृष्टमना स्तथैव कृत्वा तपस्तत्र निनाय कालम् ॥ १८-६॥

तां रावणः कामशरार्द्दितः संश्चकर्ष सा च स्तवनेन देवीम् ।
प्रसाद्य कोपारुण लोचनाभ्यां निरीक्ष्य तं निश्चल माततान ॥ १८-७॥

शशाप तं च त्वमरे मदर्थे सबान्धवो राक्षस नंक्ष्यसीति ।
स्वं कौणपस्पृष्ट मशुद्ध देहं योगेन सद्यो विजहौ सती सा ॥ १८-८॥

जाता पुनः सा मिथिलेश कन्या काले हरिं त्वां पतिमाप दैवात् ।
स हन्यतां सत्वर माशरेन्द्रः तन्नाश कालस्तु समागतश्च ॥ १८-९॥

तदर्थ माराधय लोकनाथां नवाह यज्ञेन कृतोपवासः ।
प्रसाद्य तामेव सुरा नराश्च कामान् लभन्ते शुभमेव ते स्यात् ॥ १८-१०॥

इत्यूचिवांसं मुनिमेव राम आचार्य माकल्प्य सलक्ष्मणस्त्वाम् ।
सम्पूज्य सुस्मेरमुखीं व्रतान्ते सिंहाधिरूढां च पुरो ददर्श ॥ १८-११॥

भक्त्या नतं तं द्रुतमात्थ राम हरिस्त्व मंशेन मदाज्ञयैव ।
जातो नरत्वेन दशास्य हत्यै ददामि तच्छक्ति महं तवेह ॥ १८-१२॥

श्रुत्वा तवोक्तिं स हनूमदाद्यैः साकं कपीन्द्रैः कृतसेतुबन्धः ।
लङ्कां प्रविष्टो हत रावणाद्यः पुरी मयोध्या मगमत्ससीतः ॥ १८-१३॥

हा देवि भक्तिर्न हि मे गुरुश्च न चैव वस्तु ग्रहणे पटुत्वम् ।
सत्सङ्गतिश्चापि न ते पतन्तु कृपाकटाक्षा मयि ते नमोऽस्तु ॥ १८-१४॥

** रामाय रामभद्राय रामचंद्राय वेधसे ।
रघुनाथाय नाथाय सीतायाः पतये नमः ॥ **